भार्गवेंद्रस्य निःक्षत्रीकरणं भुवः ऐलस्य सोमवंशस्य ययातेर्नहुषस्य च २५ दौष्यंतेर्भरत भ६
स्यापि शंतनोस्तत्सुतस्य च ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशोनुकीर्तितः २६ यत्रावतीर्णो भ
गवान् कृष्णाख्यो जगदीश्वरः वसुदेवगृहे जन्म ततो वृद्धिश्च गोकुले तस्य कर्माण्यपा
राणि कीर्तितान्यसुरद्विषः पूतनासुपयःपानं शकटोच्चाटनं शिशोः २७ तृणावर्तस्य नि
ष्पेषस्तथैव बकवत्सयोः धेनुकस्य सहभ्रातुः प्रलंबस्य च संक्षयः २८ गोपानां च परित्रा =
णं दावाग्नेः परिसर्पतः दमनं कालियस्याहेर्महाहेर्नंदमोक्षणं ३० व्रतचर्या तु कन्यानां य
त्र तुष्टोच्युतो व्रतैः प्रसादो यज्ञपत्नीभ्यो विप्राणां चानुतापनं ३१ गोवर्द्धनोद्धारणं च शक्र
स्य सुरभेरथ यज्ञाभिषेकः कृष्णस्य स्त्रीभिः क्रीडा च रात्रिषु ३२ शंखचूडस्य दुर्बुद्धेर्वधोरिष्ट
स्य केशिनः अक्रूरागमनं पश्चात् प्रस्थानं रामकृष्णयोः ३३ व्रजस्त्रीणां विलापश्च मथुरा
लोकनं ततः गजमुष्टिकचाणूरकंसादीनां च यो वधः ३४ ॥

पा० अस्य महिम्नस्य स्तनपयसः पाने २८ सहस्रभ्रातुः समाप्तस्य च २९ यज्ञाभिषेकयज्ञ यज्ञाभिषेकक्रम

रामः ॥

मेव शंकर इत्यतो ग्रामाहात्म्यं प्रभावः ६० एकादशगाथमाह धर्मनिर्णय. वर्णाश्रमधर्मनिर्णयः मर्त्यपरित्याग.
मनुष्यत्वस्यांतर्धानं ६२ द्वादशगाथमाह युगलक्षणानरनुरूपाच्च तिष्ठत्यर्थ. त्रिविधा प्राकृ. नित्या नैमित्तिकी नित्या
चेति ६३ अ. ये ब्रा. शिष्य सूर्यस्य च विन्यासः स्मृतो. ६६ इति चोक्तं मिति चकारादन्यदपि वः युष्माभिरिह यत्पृ. सौ।

५ कंसस्य नयनं हरेर्यो पुनः सांदीपनेर्गुरोः मथुरायां निवसनं पुत्रचक्रस्यपश्चिमं ३५ कृतमु
द्धवरामाभ्यां युतेन हरिणा द्विजाः जरासंधसमानीतसैन्यस्य बहुशो वधः ३६ घातनं यवनेंद्र
स्य कुशस्थल्या निवेशनं आदानं पारिजातस्य सुधर्मायाः सुरालयात् ३७ रुक्मिण्या हरणं युद्धे
बाणस्य भुजकृंतनं प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणं च यत् ३८ चैद्यपौंड्रकसाल्वानां दंत
वक्रस्य दुर्मतेः शंबरो द्विविदः पीठो मुरः पंचजनादयः ३९ माहात्म्यं च वधस्तेषां वाराणस्याश्च
दाहनं भारावतारणं भूमेर्निमित्तीकृत्य पांडवान् ४० विप्रशापापदेशेन संहारः स्वकुलस्य
च उद्धवस्य च संवादो वासुदेवस्य चाद्भुतः ४१ यत्रात्मविद्या ह्यखिला प्रोक्ता धर्मविनिर्णयः
ततो मर्त्यपरित्याग आत्मयोगानुभावतः ४२[illegible]नाव निक्षकलौ नृणामुपप्लवः च
तुर्विधश्च प्रलय उत्पत्तिस्त्रिविधा तथा ४३ देहत्यागश्च राजर्षेर्विष्णुरातस्य धीमतः शाखा
प्रणयनमृषेर्मार्कंडेयस्य सत्कथाः महापुरुषविन्यासः सूर्यस्य जगदात्मनः ४५ इति चो
क्तं द्विजश्रेष्ठा यत्पृष्टोहमिहास्मि व. लीलावतारकर्माणि कीर्तितानीह सर्वशः ४६ पतितः स्ख
लितश्चार्तः क्षुत्वा वा विवशो गृणन् हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ४७ ॥

मिमुतदृक मितिकि
मेवं नाथीकृपनेननम. – कीर्तितसर्वतः नतरर्पकी. तेन प्रपरेलोत्यर्थ. तत्को तेनेनापिवि. मित्यपदोपदानतः।
स्ममाह ४७ पतित स्कूर्लितश्चिरुः स्खलितः सोपामादिसुत्त्वार्त्तः दु-खितः-सुत्वा-सुतं क्रत्वा विवशोपि ४७ ॥ ॥

भा०द्वा०
टी०
३५

संकीर्त्यमानः श्रुतानुभावो यस्य स पुंसां चित्तं प्रविश्य निःशेषं व्यसनं विधुनोति निःशेषतामनुसंक्रमात्यति य
कोऽभ्रमिवातिवातः अन्यस्मिन्देहे हि संकीर्तनमेव फलं तद्
विविक्तं सर्वमित्याह ... ४७ मृषा गिरस्ता इति त्रिभिः असतीरस
त्यः असत्कथा ... यत्र ... उत्तमश्लोकस्य यशोऽनुगीयते इति ... तदेव हि सत्यं ... मंगलं तदेव
यः भगवद्गुणानामुदयो प्रकाशो यत्र तत् ४८ नवं नवं प्रत्यहं ... वारं वारं ... महोत्सवप्रदम्

संकीर्त्यमानो भगवाननंतः श्रुतानुभावो व्यसनं हि पुंसां प्रविश्य चित्तं विधुनोत्यशेषं यथा
तमोऽर्कोऽभ्रमिवातिवातः ४७ मृषा गिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्ष
जः तदेव सत्यं तदु हैव मंगलं तदेव पुण्यं भगवद्गुणोदयं ४८ तदेव रम्यं रुचिरं नवं नवं त
देव शश्वन्मनसो महोत्सवं तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकयशोऽनुगीयते ४९ न
यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् तद्ध्वांक्षतीर्थं न तु हंससेवितं यत्रा
च्युतस्तत्र हि साधवोऽमलाः ५० स वाग्विसर्गो जनताघसंप्लवो यस्मिन्प्रतिश्लोकमबद्ध
वत्यपि नामान्यनंतस्य यशोंकितानि यच्छृण्वंति गायंति गृणंति साधवः ५१

न ५० विचित्रपदं ... यस्मिन् ... तत् ध्वांक्षतीर्थं ... न प्रगृणीत ... न
... नित्यानंदं ... सेवितं न ... ५१ स वाग्विसर्गः स्याद्।
वाचः प्रयोगः जनताघसंप्लवः जनसमूहाघनाशकः ... यस्मात्
... गायंति ... इदानीं ज्ञानकर्मादेरपि भगवत्कीर्तनादिश्रेष्ठः राम:
३५

नैष्कर्म्यं तत्प्रकाशकं यज्ज्ञानं यतो निरंजनमुपाधिनिवर्तकं तदप्यच्युतभक्तिवर्जितं चेन्न शोभते नापरोक्षाय
तेन वर्त्ततीत्यर्थः ईश्वरे न चेदर्पितं तर्हि परम्परया सर्वोत्तममपि किं कर्म पुनः कुतः शोभते यतः शश्वत्साध
नकाले फलकाले च अभद्रं दुःखात्मकं किं च ५३ वर्णाश्रमाचारादिषु यः परो महानपि श्रमः स यशःश्रियामेव
कीर्तिः संपत्तिश्च केवलं न तु परमपुरुषार्थः स्वर्थैः गुणानुवादादिभिः श्रीधरपादपद्मयोरविस्मृतिरेव तु वि
ततः किमत आह ५४ क्षिणोति नाशयति अथ इदानीं श्रोतॄन्नात्मानं चाभिनंदन्नाह यूयमिति द्वाभ्यां ५५ ५६।

नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनं कुतः पुनः शश्वदभद्रमीश्वरेन
चार्पितं कर्म यदप्यनुत्तमं ५३ यशःश्रियामेव परिश्रमः परो वर्णाश्रमाचारतपःश्रुतादिषु अवि
स्मृतिः श्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्हरेः ५४ अविस्मृतिः कृष्णपदारविंदयोः क्षि
णोत्यभद्राणि शमं तनोति च सत्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तं ५५ यूयं
द्विजाग्र्या बत भूरिभागा यच्छश्वदात्मन्यखिलात्मभूतं नारायणं देवमदेवमीशमजस्रभावा भज
ताविवेश्य ५६ अहं च संस्मारित आत्मतत्वं श्रुतं पुरा मे परमर्षिवक्त्रात् प्रायोपवेशे नृपतेः प
रीक्षितः सदस्यृषीणां महतां च शृण्वतां ५७ एतद्वः कथितं विप्राः कथनीयोरुकर्मणः मा
हात्म्यं वासुदेवस्य सर्वाशुभविनाशनं ५८ य एतं श्रावयेन्नित्यं यामक्षणमनन्यधीः श्रद्धावा
न्योऽनुशृणुयात्पुनात्यात्मानमेव सः ५९ ॥

जाग्रताः यद्यस्मादात्मन्यंतःकरणे नारायणमावि
वेश्य भजत भजतं संभावयतां सतोः हरिभागाः बहुभाग्याः कथं ... सर्वात्मभूतं अतएव देवं
सर्वोपास्यं अदेवो ... परमानंदं शोधयः ... ५७ परिभागाः तथ आदि संपन्नाः ... भजते ति वि
धिः ५६ मेम पाक्य [redacted] मेतत्पुराणकीर्तनादिफलं प्रपंचयितुमाह एतद्वः ... मिः ५७ मा
हात्म्यं सर्वैः आत्मानमेव साक्षात्पुनाति न तु ... ५९ ॥ रामः ॥ रामः ॥

ऋचो यजूंषि सामानि द्विजोऽधीत्य मधुकुल्यादि यदनुविंदते तत्फलमेतां पठित्वाऽनुविंदतेऽस्मि ६३ किं च प्रोक्तमिति ६४ राज
न्य उदधिमेखलां पृथ्वीं सार्वभौमः सुखस्य पुराणस्यैव प्रभावविवेककारणमाह कलिमलानां संहतिकालनः
विनाशयिता इतिर्तथा तत्र शास्त्रान्तरे शास्त्रप्रतिपादितभगवन्नमस्करोमि तमिति द्वाभ्यां जगदुदयस्थिति

द्वादश्यामेकादश्यां वा शृण्वन्नायुष्मान्भवेत् पठत्यनश्नन्प्रयतस्ततो भवत्यपातकी ६० पु
ष्करे मथुरायां च द्वारवत्यां यतात्मवान् उपोष्य संहितामेतां पठित्वा मुच्यते भयात् ६१ देवता मुन
यः सिद्धाः पितरो मनवो नृपाः यच्छन्ति कामान्गृणतः शृण्वतो यस्य कीर्तनात् ६२ ऋचो यजूं
षि सामानि द्विजोऽधीत्यानुविंदते मधुकुल्या घृतकुल्याः पयःकुल्याश्च तत्फलं ६३ पुराणसंहिता
मेतामधीत्य प्रयतो द्विजः प्रोक्तं भगवता यत्तु तत्पदं परमं व्रजेत् ६४ विप्रोऽधीत्याप्नुयात्प्रज्ञां राजन्यो
दधिमेखलां वैश्यो निधिपतित्वं च शूद्रः शुध्येत पातकात् ६५ कलिमलसंहतिकालनोऽखि
लेशो हरिरितरत्र न गीयते ह्यभीक्ष्णं इह तु पुनर्भगवानशेषमूर्तिः परिपठितोऽनुपदं कथाप्रसंगैः
६६ तमहमजमनन्तमात्मतत्त्वं जगदुदयस्थितिसंयमात्मशक्तिं द्युपतिभिरजशक्रशंकराद्यैर्दुरवसि
तस्तवमच्युतं नतोऽस्मि ६७ उपचितनवशक्तिभिः स्व आत्मन्युपरचितस्थिरजंगमालयाय भगव
त उपलब्धिमात्रधाम्ने सुरऋषभाय नमः सनातनाय ६८ स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावो
ऽप्यजितरुचिरलीलाकृष्टसारस्तदीयं व्यतनुत कृपया यस्तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं
व्याससूनुं नतोऽस्मि ६९ इति श्रीभागवते महापुराणे द्वादशस्कन्धे द्वादशोऽध्यायः १२ । राम

संयमात्मशक्तिः ... शक्रशंकरप्रभृतिभिर्दुरवसितस्तवः अज्ञातस्तवः स्तोत्रं यस्य तं उपचिताभिर
हृत्ताभिर्नवशक्तिभिः ... त्रिगुणमहदहंकारतन्मात्ररूपाभिः स्व आत्मन्येवोपरचितस्थिरजंगमालयाय ६८
स्पतस्मै भगवते ६८ श्रीशुकं नमस्करोति स्वसुखेनैव निभृतं पूर्णं चेतो यस्य सः तेनैव व्युदस्तोऽन्यभावो यस्मि

रमार्थप्रकाशकः श्रीभागवतपोतमनुमनननो॥ इति ६९ ॥ इति श्रीभागवतभावार्थदीपिकायां द्वादशे द्वादशः १२
पुराणसंख्याकथ्यते त्रयोदशे यथाक्रमं परमानन्दमहिमा नारदस्य शुकस्य च १ सर्वपुराणसारस्यादौ निरूपणे।
विघ्नस्तत्स्तुतिपाठ्ये देवप्रणाममित्यमिति सर्वैर्वेदैः सम्यक् स्तुवन्ति तु यन्निषद्धं कमठस्याकारस्य पृष्ठे भ्रमरोधेनधा-
नेनावस्थितेनाभिनिविष्टेन तद्गतेन मनसा न तेन यस्यान्तं न विदुः सुरासुरगणा क्षीरोदमथनादौ दृष्टं यत्तमेव प्रदर्शयन्

यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवैर्वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः
१ पृष्ठे भ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयनान्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पा-
न्तु वः यत्संस्कारकलानुवर्तनवशाद्वेलानिभेनाम्भसां यातायातमतन्द्रितं जलनिधेर्नाद्यापि वि-
श्राम्यति २ सूत उवाच पुराणसंख्यासंभूतिमस्य वाच्यप्रयोजने दानं दानस्य माहात्म्यं पाठादे-
श्च निबोधत ३ ब्राह्मं दशसहस्राणि पाद्मं पञ्चोनषष्टि च श्रीवैष्णवं त्रयोविंशच्चतुर्विंशति
शैवकं ४ दशाष्टौ श्रीभागवतं नारदं पञ्चविंशति मार्कण्डं नव वाह्नं च दशपञ्च चतुःशतं ५
चतुर्दश भविष्यं स्यात्तथा पञ्चशतानि च दशाष्टौ ब्रह्मवैवर्तं लैङ्गमेकादशैव तु ६

कूर्मावतारमनुस्मरन् ग्रन्थाशिषं प्रार्थयते पृष्ठे इति १ पृष्ठे भ्राम्यन् अमन्दो गरिष्ठो मन्दरगिरिस्तस्य ग्रा-
वाणस्तेषामग्राणि तैः कण्डूयनात्तेन सुखेन निद्रालोः निद्राशीलस्य येषां श्वासानिलानां संस्कारा-
स्तेषां कला लेशास्तदनुवर्तनवशात् जलनिधेरम्भसां यातायातं न विश्राम्यति न तु समुद्रस्वभावेन
तेन संस्कारवशात् तद्याह वेलानिभेन मिषेण २ पुराणसंख्यायाः संभूतिं समाहारं च।
अस्य तु श्रीभागवतस्य वाच्यं विषयप्रयोजने पाठादेश्च माहात्म्यं चेति निबोधत ३ चतुर्विंश-

भा०ऊ०
टी०टी०
३७

स्कांदशानाधिकैःकाशीनिसहस्त्रक ६ सौरमार्गश ८ पुराणमेकोनविंशत ९ कोनविंशति ७ महाभारतमित्यादि
रामायणचतुःविंशीकृकाव्य मत पुराणानामेतदेहृत्वचतुर्लक्षसंख्यक. तत्र ६ हानीमस्यकोचाष्टयोजनादी
न्वतुमाहं नत्रेसाशिन्नं ८ हंसिलीलाकथानोधान समः ह. सर्वाभ्रतेनानेविशा मन सुराक्षयेनतत ९ ले

चतुर्विंशतिवाराहैमेकाशीतिसहस्त्रकं स्कांदशततमाश्चैकवामनंदशकीर्तितं ६
कौर्मसप्तदशाख्यातमात्स्यंतत्तुचतुर्दश एकोनविंशतीगार्वड्ब्रह्मांडंद्वादशैवतु ७ एवं
पुराणसंदोहश्चतुर्लक्षउदाहृतः तत्राष्टादशमाहस्त्रं श्रीभागवतमिष्यते ८ इदंभगवता
पूर्वंब्रह्मणेनाभिपंकजे स्थिताय भवभीताय कारुण्यात्संप्रकाशितं ९ आदिमध्याव
सानेषुवैराग्यज्ञानसंयुतं हरिलीलाकथाव्राताम्रतानंदितसत्सुरं १० सर्ववेदांतसा
रंयद्ब्रह्मात्मैकत्वलक्षणं वस्त्वद्वितीयंतन्निष्ठं कैवल्यैकप्रयोजनं ११ प्रोष्ठपद्यांपौर्ण
मास्यांहेमसिंहसमन्वितं ददातियोभागवतंसयातिपरमांगतिं १२ राजंतेतावदन्यानि
पुराणानिसतांगणे यावद्भागवतंनैवश्रूयतेऽमृतसागरं १३ सर्ववेदांतसारंहिश्रीभा
गवतमिष्यते तद्रसाम्रततृप्तस्यनान्यत्रस्याद्रतिःक्वचित १४ निम्नगानांयथागंगादे
वानामच्युतोयथा वैष्णवानांयथाशंभुःपुराणानामिदंतथा १५ क्षेत्राणांचैवसर्वेषांयथाका
शीह्यनुत्तमा तथापुराणव्रातानांश्रीमद्भागवतंद्विजाः १६ श्रीमद्भागवतंपुराणममलंयद्वैष्णवानांप्रियं यस्मिन्पारमहंस्यमेकममलंज्ञानंपरंगीयते तत्रज्ञानविरागभक्ति
सहितंनैष्कर्म्यमाविष्कृतं तच्छृण्वन्विपठन्विचारणपरोभक्त्याविमुच्येन्नरः १७ ॥

निर्वचनं नदेहस्य १२ प्रोष्ठपद्यामारुण्याहेमसिंहसमन्वितमुवर्णसिंहासनादा २८ १२ महत्सर्वाक्रमन तेमहत्परस्यवि रामः
दूष्नस्य १५ पारमहंस्यपरमहंसे प्राप्य नैष्कर्म्यसर्वकर्मोपरम भक्त्यानवजूपवर्गादियर विमुच्येत विमुच्यते १६ ३७

श्रीभागवतसंप्रदायप्रवर्तकरूपेण भगवद्ध्यानलक्षणं मङ्गलमाचरति कस्मैइति कस्मै ब्रह्मणे अतुलं असम
म अयं श्रीभागवतरूपः पुरा कल्पादौ तद्रूपेण ब्रह्मरूपेण तद्रूपिणा नारदरूपिणा योगीन्द्राय शुकाय पतत्

कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा तद्रूपेण च नारदाय मुनये कृष्णाय तद्रू
पिणा योगीन्द्राय तदात्मनाथ भगवद्राताय कारुण्यतस्तच्छुद्धं विमलं विशो
कममृतं सत्यं परं धीमहि १९ नमस्तस्मै भगवते वासुदेवाय साक्षिणे य इदं कृ
पया कस्मै व्याचचक्षे मुमुक्षवे २० योगीन्द्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे
संसारसर्पदष्टं यो विष्णुरातममूमुचत् २१ । रामायनमः ॥

तेनाशुकरूपेण तत्परं सत्यं श्रीनारायणाख्यं तत्त्वं धीमहि गायत्र्यैवय थोपक्रममुपसंहरतु गायत्र्याख्य
ब्रह्मविद्येयमिति दर्शयति तमेव देवतारूपेणाशुरूपेण च प्रणमति नम इति द्वाभ्यां २० व्याचचक्षे व्याख्या
राम राम राम
तवान् २० विष्णुरातं परीक्षितं २१

श्री० भा० सं०
द्वा० टी०
३१८

इतिश्रीभागवते महापुराणे पारमहंस्यामष्टादशसाहस्र्यां संहितायां श्रीश्रीधरस्वामिविरचितायां भावार्थदीपिकायां द्वादशस्कंधे त्रयोदशोऽध्यायः १३ भावार्थदीपिकामेनां भगवद्भक्तवत्सलः परमानंदरूपात्मा श्रीकृष्णोधरीकरोतु १ स्ववाक्यचपलालापे स्वलीलापरिगीतिते भ्रमीयतापरमानंदरूहरि स

भवेभवे यथाभक्तिः पादयोस्तव जायते तथा कुरुष्व योगीशाना थस्त्वमेव त ब्रभो २० नामसंकीर्तनं यस्य सर्वपापप्रणाशनं प्रणामो दुःखशमनस्तं नमामि हरिं परं २१ इतिश्रीभागवते महापुराणे वैयासिक्यां संहितायां द्वादशस्कंधे पुराणसंख्यावर्णनं नाम त्रयोदशोऽध्यायः १३ समाप्तमिदं श्रीभागवतनाम महापुराणमित्योम ॥०॥ लिखितमलचंदेन ॥०॥ संवत् १९०१० मिति मार्गशिर सुदि ५ ॥ राम ॥

द्वा० स्कं० २ श्रीपरानंदसंदोहगुह्यं भागवतं मया विवृतं तन्मतेनेदं न तु स्वमतिवैभवात् ३ समाप्ता चेयं श्रीपरमानंदशिष्यश्रीश्रीधरस्वामिविरचिता श्रीभागवतमहापुराणटीका ॥ ॐ कामपीठे निरतापरवाग्भवस्थावीजसदैवधतीं मम कामराज शक्त्यान्विता कपरदुर्गा मे रूपा दुर्गा नमाम्यभयदी त्रिपुरा च भक्त्या ॥ राम
३१८

भा०भो०

२६ नामषष्ठोऽध्याय ६॥ संवत् १९६०॥ लिखितं मूलचंदेन ॥ रामायनम ॥

परिपालितानां हे माधवे भागवतं प्रजल्पति ९३ शौनक उवाच शुकेनोक्तं कदा राज्ञे गो
कर्णेन कदा पुनः सुरर्षये कदा चास्माकं संशयं छिंधि मे संशयं लिरे ९४ सूत उवाच आकृष्ण नि
र्गमाद्विंशद्वर्षाधिगते कलौ नवमीतो नभस्ये च कथारंभं शुकोऽकरोत् परीक्षिच्छ्रवणां
ते च कलौ वर्षशतद्वये शुद्धे शुचौ नवम्यां च धेनुजोऽकथयत्कथां ९५ अस्मादपि कलौ
याते त्रिंशते सप्तदशके ऊर्जे शुक्ले नवम्यादि सेनवम्याद्ब्रह्मजाः सुताः ९६ इति ते सर्वमाख्यातं
यत्पृष्टोऽहं त्वयानघ कलौ भागवती वार्ता भवरोगविनाशिनी ९७ कृष्णप्रियं कलिमल
घ्नमिदं च मुक्त्यैकहेतुमिह भक्तिविलासकारि संतः कथानकमिदं पिबतादरेण लोके हि
तीर्थपरिशीलसेवया किं ९८ स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले
परिहर भगवत्कथासु मत्तान्प्रभुरहमन्यनृणां न वैष्णवानां १०० असारे संसारे विषयविष
संकुलमलधियः क्षणार्धं क्षेमार्थं पिबत शुककथातुलसुधां किमर्थं व्यर्थं भो व्रजत कुपथे कुत्सि
तकथे परीक्षित्साक्षी यच्छ्रवणगतमुक्त्युक्तिकथने १०१ रसप्रवाहसंस्थेन श्रीशुकेनेरि
ता कथा कंठे संबध्यते येन स वैकुंठप्रभुर्भवेत् १०२ इति च परमगुह्यं सर्वसिद्धांतसिद्धं
सपदि निगदितं ते शास्त्रपुंजं विलोक्य जगति शुककथातो निर्मलं नास्ति किंचित्पिब त
रसुखहेतोर्द्वादशस्कंधसारं १०३ एतां यो नियततया शृणोति भक्त्या यश्चैनां कथयति
वैष्णवाग्रतोपि एतौ सम्यग्विधिकरणात्फलं लभेते याथार्थ्यान्नहि भुवने किमप्यसा
ध्यं १०४ इति श्रीपद्मपुराणे उत्तरखंडे श्रीमद्भागवतमाहात्म्ये श्रवणविधिकथनो

भा०मा० रसं संमगुन्नतमंसे गिरिं ८० श्रीशुक उवाच इति मम कस्यचित् गोमेलितं फलं मम गुरवाद मतत्त्व
५५ सेवते विरतभागवतेरसमालयमुरु रहो रसिकाभुवि भावुकाः ८१ धर्मः प्रोज्झितकैतवोऽत्र परमो
निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनं श्रीमद्भागवते महामुनिकृते
किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ८२ श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां धनं यस्मिन्पारमहंस्यमेवममलं ज्ञानं परं गीयते यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन्प्रपठन्विचारणपरो भक्त्या विमुच्येन्नरः ८३ स्वर्गे सत्ये
च कैलासे वैकुण्ठे नास्त्ययं रसः अतः पिबन्तु सद्भाग्या मामा मा मुञ्चत कर्हिचित् ८४ सूत उवाच इ
ति ब्रुवाणे सति बादरायणौ मध्ये सभायां हरिराविरासीत् प्रह्लादबल्युद्धवफाल्गुनादिभिर्वृतः सुरर्षिस्तमपूजयच्च ताम् ८५ दृष्ट्वा प्रसन्नं महदासने विधाय ते चक्रि
रे कीर्तनमग्रतस्तदा भवो भवान्या कमलासनस्तु तत्रागमत्कीर्तनदर्शनाय ८६ प्रह्लाद
स्तालधारी तरलगतितया चोद्धवः कांस्यधारी वीणाधारी सुरर्षिः स्वरकुशलतया रागकर्ता
र्जुनोऽभूत् इन्द्रो वादीन्मृदङ्गं जयजयसुकराः कीर्तने ते कुमाराः यत्राग्रे भाववक्ता सरसविरचनया व्यास
पुत्रो बभूव ८७ ननर्त मध्ये त्रिकमेव तत्र भक्त्यादिकानां नटवत्सुतेजसाम् अलौकिकं कीर्तनमेत
दीक्ष्य हरिः प्रसन्नोऽपि वचोऽब्रवीत्ततः ८८ मत्तो वरं भाववृताद्वृणीध्वं प्रीतः कथाकीर्तनतोऽस्मि साम्प्र
तं श्रुत्वेति तद्वाक्यमतिप्रसन्नाः प्रेमार्द्रचित्ता हरिमूचिरे ते ८९ नगाहगाथासु च सर्वभक्तैरेभिस्त्व
५४ या भाव्यमतिप्रयत्नात् मनोरथोऽयं परिपूरणीयस्तथेति चोक्त्वान्तरधीयताच्युतः ९० ततोऽनमच्छुकस्य
नारदस्तत्पादकारीनपितामहानिव प्रत्यागताः प्राप्य ततोऽस्य मोहाः सर्वे ययुः शीलकथारसास्ते ९१
भक्तिः सुतास्तौ सह रक्षिताः प्राप्य स्वकीयं पितरं शुकेन अतो हरिर्भागवतस्य सेवनाच्चित्ते म
मायाति हि वैष्णवानां ९२ दारिद्र्यदुःखज्वरदाहितानां मायापिशाचीपरिमर्दितानां संसारसिन्धौ राम:
५५
तर

वाहनकुर्यात्द्रव्यश्रायुसमाहितः तन्मयत्वात्पुराणास्यपरमस्यस्यतत्त्वम्. ६२ होमाशक्तौबुधोहोमं
दशांशकं तत्सिद्धये विप्रस्यविरोधार्थंमूनताधिकतादयोः ६३ दोषयोःप्रशमार्थंचपठेन्नाम
सहस्रकं तेनस्यात्सफलंसर्वंनास्यस्मादधिकंपरं ॥६४ द्वादशब्राह्मणान्पश्चाद्भोजयेन्मधुपा
यसै व्रताहपूर्णंधेनुंचव्रतस्यपरिपूर्तिसिद्धये ६५ शक्तौपलत्रयमितंस्वर्णसिंहविधायच तत्रास्यपुस्त
कंस्थाप्यंलिखितंललिताक्षर ६६ संपूज्यावाहनाद्यैस्तदुपचारैः सदक्षिणं वस्त्रभूषणगंधाद्यैः
पूजितायायतात्मने ६७ आचार्यायसुधीर्दत्वामुक्तः स्याद्भवबंधनैः एवंकृतेविधानेचसर्वपाप
निवारणे ६८ फलदस्यात्पुराणानुश्रीमद्भागवतंशुभं धर्मार्थकाममोक्षाणांसाधनंनात्रसंशय
६९ इतितेकथितंसर्वंकिंभूयः श्रोतुमिच्छसि श्रीमद्भागवतेनैवभक्तिमुक्ति प्रकाशिता ७० सू
तउवाच इत्युक्त्वातेमहात्मानः प्रोचुर्भागवतीकथा सर्वपापहरांपुण्यांभक्तिमुक्तिप्रदायिनीं ७१
श्रृण्वतांसर्वभूतानांसप्ताहंनियतात्मनां यथाविधिततोदेवंतुष्टुवुः पुरुषोत्तमं ७२ तदंतेज्ञानवै
राग्यभक्तीनांपुष्टतापरा तारुण्यंपरमंचाभूत्सर्वलोकमनोहरं ७३ नारदश्चकृतार्थोभूत्सिद्धे
स्वीयेमनोरथे पुलकीकृतसर्वांगः परमानंदसंभृतः ७४ एवंकथांसमाकर्ण्यनारदोभगवत्प्रि
यः प्रेमगद्गदयावाचातानुवाचकृतांजलिः ७५ श्रीनारदउवाच धन्योस्म्यनुगृहीतोस्मिभवद्भि तो ६
करुणापरैः अद्यमेभगवाल्लब्धः सर्वपापहरोहरिः ७६ श्रवणंसर्वधर्मेभ्योवरंमन्येतपोध
नाः वैकुंठस्थोयतः कृष्णः श्रवणाद्यस्यलभ्यते ७७ सूतउवाच एवंब्रुवतिवैतस्मिन्नारदेवैस्न
वोत्तमे परिभ्रमन्समायातः शुकोयोगेश्वरस्तदा ७८ तत्रायपौषोडशवार्षिकः सदाव्यासात्म
जोज्ञानमहाब्धिचंद्रमाः कथावसानेनिजलाभपूर्णः प्रेम्णापठन्भागवतंशनैःशनैः ७९ दृ
ष्ट्वासदस्याः परमोरुतेजसंसद्यःसमुत्थायददुर्महासनं प्रीत्यासुरर्षिस्तमपूजयत्सुखंस्थितमोव

गौ॰मा॰ रि ४२ समाहर्त्तिनाशुसानियमान्मुणुनारद विमुरीक्षाविहीनानां नाधिकारः कथाश्रवे ४३ ब्रह्म
१२ चर्यमध सुप्ति पत्रावल्यांच भोजनं कथासमाप्तौ भुक्तिंचकुर्यान्नित्यकथाव्रती ४४ हिरलमधुतैलंच
गरिष्ठान्नंतथैवच भावदुष्टंपर्युषितं नजह्यान्नित्यकथाव्रती ४५ वृन्ताकंचकलिंगाद्यद्यमसूर
निका निष्पावानामिषाद्यंचवर्जयेत्तुकथाव्रती ४६ पलाण्डुलशुनंहिंगुमूलकंगृञ्जनंतथा नालिका
मूलंकूष्माण्डंनैवाद्यात्कथाव्रती ४७ कामक्रोधमदमानमत्सरंलोभमेवच दंभमोहं तथाद्वेषंदूरयेत्
चकथाव्रती ४८ वेदवैष्णवविप्राणांगुरुगोव्रतिनांतथा स्त्रीराजमहतांनिंदावर्जयेद्यः कथाव्रती ४९
रजस्वलांत्यजम्लेच्छपतिताव्रतकैस्तथा द्विजद्विड्वेदबाह्यैश्च नवदेद्यः कथाव्रती ५० सत्यंशौचं द
यामौनमार्जवंविनयंतथा उदारमानसंतद्वत्कुर्यादेवकथाव्रती ५१ दरिद्रश्चक्षयीरोगीनिर्भाग्यः
पापकर्मवान् अनपत्योमोक्षकामः शृणुयात्सकथामिमां ५२ अपुष्पाकाकवंध्याचवंध्यायाच
मृतार्भका स्रवद्गर्भाचयानारीतयाश्राव्याप्रयत्नतः ५३ एतेषुविधिनाहत्तदक्षयतरंभवेत् अ
त्युत्तमामिदंनित्यं सत्कथादिव्यफलप्रदा ५४ एवंकृत्वाव्रतविधिंमुद्यापनमथाचरेत् जन्माष्ट
मीव्रतवत्कर्तव्यंफलकांक्षिभिः ५५ अकिंचनेषुभक्तेषु प्रायोनोद्यापनाग्रहः श्रवणेनैवपूतास्ते
निष्कामावैष्णवायतः ५६ एवंनगाहयज्ञेस्मिन्समाप्तेश्रोतृभिस्तदा पुस्तकस्यचपूजा
कार्यातिभक्तितः ५७ प्रसादस्तुलसीमालाश्रोतृभ्यश्चप्रदीयतां मृदंगताललालितंकर्तव्यंकी
र्तनंततः ५८ जयशब्दोनमःशब्दः शंखशब्दश्चसर्वतः विप्रेभ्योयाचकेभ्यश्चवित्तमन्नंचदी
यतां ५९ विरक्तश्चेद्भवेच्छ्रोतागीतावाच्यापरेहनि गृहस्थश्चेत्तदाहोमः कर्तव्यः कर्मशान्तये ६०
प्रतिश्लोकंचजुहुयाद्विधिनादशमस्यच पायसंमधुसर्पिश्चतिलान्नादिकसंयुतं ६१ अथवा राम
१२

कथाविघ्नविघातार्थं गणनाथं प्रपूजयेत् २४ पितॄन् संतर्प्य शुद्ध्यर्थं प्रायश्चित्तं समाचरेत् मंडलं च
प्रकर्तव्यं तत्र स्थाप्यो हरिस्तथा २५ कृष्णमुद्दिश्य मंत्रेण चरेत्पूजाविधिं क्रमात् प्रदक्षिणनमस्कारान्
पूजांते स्तुतिमाचरेत् २६ संसारसागरे मग्नं दीनं मां करुणानिधे कर्ममोहगृहीतांगं मामुद्धर भवार्णवात् २
७ श्रीमद्भागवतस्यापि ततः पूजा प्रयत्नतः कर्तव्या विधिना प्रीत्या धूपदीपसमन्विता २८ ततस्तु श्रीफ
लं धृत्वा नमस्कारं समाचरेत् स्तुतिः प्रसन्नचित्तेन कर्तव्या केवलं तथा २९ श्रीमद्भागवताख्यस्त्वं प्रत्य
क्षः कृष्ण एव हि स्वीकृतोसि मया नाथ मुक्त्यर्थं भवसागरे ३० मनोरथो मदीयोयं सफलः सर्व
था त्वया निर्विघ्नेनैव कर्तव्यो दासोहं तव केशव ३१ एवं दीनवचः प्रोक्त्वा वक्तारं चाथ पूजयेत् सं
भूष्य वस्त्रभूषाभिः पूजांते च संस्तवेत् ३२ शुकरूप प्रबोधज्ञ सर्वशास्त्रविशारद एतत्कथाप्रका
शेन मदज्ञानं विनाशय ३२ तदग्रे नियमः पश्चात्कर्तव्यः श्रेयसे मुदा सप्तरात्रं यथाशक्त्या धारणीयः
स एव हि ३३ वरणं पंचविप्राणां कथाभंगनिवृत्तये कर्तव्यं तैर्हरेर्जाप्यो द्वादशाक्षरविद्यया ३४ ब्राह्म
णान्वैष्णवांश्चान्यांस्तथा कीर्तनकारिणः नत्वा संपूज्य दत्ताज्ञः स्वयमासनमाविशेत् ३५ लोकवि
त्तधनागारपुत्रचिंतां व्युदस्य च कथाचित्तः शुद्धमतिः स लभेत्फलमुत्तमं ३६ आसूर्योदयमारभ्य सार्धत्रि
प्रहरांतकं वाचनीया कथा सम्यक् धीरकंठं सुधीमता ३७ कथाविरामः कर्तव्यो मध्याह्ने घटिकाद्वयं
तत्कथामनु कार्यं वै कीर्तनं वैष्णवैस्तदा ३८ मलमूत्रजयार्थं हि लघ्वाहारः सुखावहः हविष्यान्ने
न कर्तव्यो ह्येकवारं कथार्थिना ३९ उपोष्य सप्तरात्राणि शक्तिश्चेच्छृणुयात्तदा घृतपानं पयःपा
नं कृत्वा वा शृणुयात्सुखं ४० फलाहारेण वा भाव्यमेकभक्तेन वा पुनः सुखसाध्यं भवेद्यत्तु कर्तव्यं वार२
श्रवणाय तत् ४१ भोजनं तु वरं मन्ये कथाश्रवणकारकं नोपवासो वरः प्रोक्तः कथाविघ्नकरो य

भा०मा०
२१

प्रयत्नतः विवाहे यादृशं वित्तं तादृशं परिकल्पयेत् २ नभस्य आश्विनोर्जौ च मार्गशीर्षः शुचिर्नभाः ए
ते मासाः कथारंभे श्रोतॄणां मोक्षसूचकाः ३ मासानां विप्र हेयानि तानि त्याज्यानि सर्वथा सहायाश्चेत
रे चात्र कर्तव्याः सोद्यमास्तथा ४ देशे देशे तथा सेयं वार्ता प्रेष्या प्रयत्नतः भविष्यति कथा चात्र आगंत
व्यं कुटुंबिभिः ५ दूरे हरिकथाः केचिद्दूरे चाच्युतकीर्तनाः स्त्रियः शूद्रादयो ये च तेषां बोधो यतो भवेत् ६
देशे देशे विरक्ता ये वैष्णवाः कीर्तनोत्सुकाः तेष्वेव पत्रं प्रेष्यं च तल्लेखनमितीरितं ७ सतां समाजो भवि
ता सप्तरात्रं सुदुर्लभः अपूर्वरसरूपैव कथा चात्र भविष्यति ८ श्रीमद्भागवतपीयूषपानाय रसलं
पटाः भवंतश्च तथा शीघ्रमायात प्रेमतत्पराः ९ नावकाशः कदाचिच्चेद्दिनमात्रं तथापि च सर्वथाऽऽग
मनं कार्यं क्षणोऽत्रैव सुदुर्लभः १० एवमाकारणं तेषां कर्तव्यं विनयेन च आगंतुकानां सर्वेषां वासस्थाना
नि कल्पयेत् ११ तीर्थे वापि वने वापि गृहे वा श्रवणं मतं विशाला वसुधा यत्र कर्तव्यं तत्कथास्थलं
१२ शोधनं मार्जनं भूमेर्लेपनं धातुमंडनं महोपस्करमुद्धृत्य गृहकोणे निवेशयेत् १३ अर्वाक्पंचाहतो यत्ना
दास्तीर्णानि प्रमेलयेत् कर्तव्यो मंडपः प्रोच्चैः कदलीखंडमंडितः १४ फलपुष्पदलैर्विष्वग्वितानेन विरा
जितः चतुर्दिक्षु ध्वजारोपो बहुसंपद्विराजितः १५ ऊर्ध्वं सप्तैव लोकाश्च कल्पनीयाः सविस्तरं तेषु विप्रा वि
रक्ताश्च स्थापनीयाः प्रबोध्य च १६ पूर्वं तेषामासनानि कर्तव्यानि यथोत्तरं वक्तुश्चापि तदा दिव्यमासनं प
रि कल्पयेत् १७ उदङ्मुखो भवेद्वक्ता श्रोता वै प्राङ्मुखस्तदा प्राङ्मुखश्चेद्भवेद्वक्ता श्रोता चोदङ्मुखस्तदा
१८ अथवा पूर्वदिग्ज्ञेया पूज्यपूजकमध्यतः श्रोतॄणामागमे प्रोक्ता देशकालादिकोविदैः १९ विरक्तो
वैष्णवो विप्रो वेदशास्त्रविशुद्धिकृत् दृष्टांतकुशलो धीरो वक्ता कार्योऽतिनिःस्पृहः २० वक्तुः पार्श्वे सहाया
र्थमन्यः स्थाप्यस्तथाविधः पंडितः संशयच्छेत्ता लोकबोधनतत्परः २२ वक्त्रा क्षौरं प्रकर्तव्यं दिनादर्वा
क् व्रताप्तये अरुणोदयेऽसौ निर्वर्त्य शौचं स्नानं समाचरेत् २३ नित्यं संक्षेपतः कृत्वा संध्याद्यं स्वं प्रयत्नतः राम
२२

स्पृश्यचिरेणैव भूतले १२ अदृष्टे चरते सा तु समादेशं तस्य श्रुत्वं संहितो यो हि हतो मे यो हि धावति चिंतितो जपः १३
अवैष्णवो हतो देशो हतं स्वाहत्मे वैष्णवं हतमश्नाति विप्रेशमनाचार हतं कुलं १४ विष्णुसेवारतो[illegible]
त्वमित्रीतस्य भावना मनोहस्तं पवित्रं[illegible]लाभमति: १५ एवं[illegible]सर्वे वैकुंठ हरिकी
र्तनाः १६ श्रावणो मासि शुक्ले च पवित्रं[illegible]संप्रार्थ्य[illegible]भक्तिः[illegible]ले १७ क
न्यासमाप्तेप्रजातिकृत्[illegible]निर्विभ्रवेद्यः। १८ अयुग्मादाः नमः
[illegible]समाकरोत्स्व
सहेशा हरिः[illegible]पान[illegible]यवासमः २१ किंचिदिन: कुर्वन्[illegible]हरिः स
[illegible]गातः २२ विमाने[illegible]पयसा[illegible]
[illegible]लोके नेय[illegible]सिता[illegible]: २३ गोप[illegible]सोमं कन्या[illegible]
[illegible]वसत्त्व २४ अयोध्यावासिन: पूर्वं[illegible]तथा[illegible]मतेनैव तागो
लोकं यो[illegible]सोमस्य[illegible]सलोकं[illegible]
वास २५ कृष्णो[illegible]सर्वे सो[illegible]
[illegible]मतानि मवः २६ [illegible]लोकं चितैः[illegible]
[illegible]वैष्णवोऽति[illegible]२७ इति हासमिमं पुण्यं शृणोत्यत्र पितमुनी[illegible]।
रः पठते[illegible]परिप्लुतः २९ [illegible]सह[illegible]हरेर्गोवि
[illegible]भवेच्च ३० इति श्रीपद्मपुराणे[illegible]
[illegible]नाम पंचमोऽध्यायः ५ कुमारा ऊचुः अथ तेऽसव[illegible]
मः[illegible]विधिः[illegible]: १ देव[illegible]

भा०मा नित्यमाहात्म्यं वेश्मसु ते अस्मांकं पल्लवसन्न्यं कथयस्वैक चित्तयति ५४ आर्द्रमुष्क लघुरस्थुलवाल
१० न कर्मणि कृते तत्वमार्गिरिहेतायपावक समिधोयथा ५५ अग्निममेवभारतेषवर्षेहस्मिन्दे
वनसरि कथयसुव्रतामियाशेसनिधा तज्जन्मकीर्तित ५६ किमोहतुहितेमे सुपुष्टे नवल्लीय ८३
ता अत्र योग्यापूरीरमाअकथात्मकयाविना ५७ आसिकर्थसमायुवे मासस्योगिनानुत्तापि
ते चमावनद्दुग्धयाअमन्नभूमिवको ५८ अतोशोक विस्तारार्थेरोगमारिरमातुर दु पुरदुदर
दुष्ट सरोषेदत्तामयुर ५९ कमिविहमसंस्थानशरीरमिनिवर्गीत अस्थिरेतास्थिरकमेकु
तामसाधयेन्मोरे ६० यथात सत्कृतस्सकलसायमन्नविनश्यमि सदीपरसतपुष्ट कापिकानाम
मिल्पता ६१ सम्मोहसवयासुकेसाध्यतोनिकरेहरि अतोदेवानिरवसर्पमेत देवहिसाधने ६२
भुरास्वतोयमुमस्कारवजेतुभु आयतेमरणा पिवकथाश्रवणाच्चतेला ६३ अतस्य भूक
वशस्यपथ्यार्थविमेरन चित्रकिमुमदाचितगौपमे देकथाअवात ६४ विदातेहृदयंथापि
छिद्यतेसर्व संशया. सीयतेसर्वकर्माणि मम्मोहस्ववसीकृते ६५ मदारकेर्दमात्मेपयस्त्वन
पटोपमा कथातीर्थक्षितेचित्तेमुक्तिरेववुधैस्मृता ६६ एवरूपिचेतामान विमानमयते ८?
हा वेकुठवासिमिर्युक्तमस्तु रहोपिमण्डले ६७ सर्वेषांपश्यतामेवविमाने धुधुसोमुत वि।
मानेवेसघान्वीरागोकगौवाकामभुवीत ६८ गोकर्णउवाच अत्रैवबहव सतिश्रोतारोम
मनिमेमलाः आमीतानिविमानानितेषाननुसंपस्कृत ६९ श्रवणंसमभागेनसर्वेषामिहह
दृष्टं फलभेदःकुतोजातः प्रब्रूवन्तु हरिप्रियाः ७० हरिदासाऊचु प्रवणस्य वि
भेदेन फलभेदोत्रसंस्थित श्रवणंतुकृतंसर्वैर्नतथा मननंकृत ७१ फलमेदस्ततोयो समा
न वृत्त फ्याद्वाङ्मिदयति सश्रवत्रमुपोषितैश्रपेनेनश्रवणंकृत न मननाद्दिनथातेन १९

किंमैवंभविष्यति उपायमपरंकिंचिन्नविचारयसांप्रतं ३३ इतितद्वाक्यमाकर्ण्यगोकर्णोविस्मयंगतः श
तश्राद्धैर्नमुक्तिश्चेदसाध्यंमोचनंतव ३४ इदानींतुनिजंस्थानमातिष्ठप्रेतनिर्भयः त्वन्मुक्तिसाधनं
किंचिदाचरिष्येविचार्यच ३५ धुंधुकारीनिजस्थानंतेनादिष्टस्ततोगतः गोकर्णश्चिंतयामासतांरात्रि
नतदध्यगात् ३६ प्रातस्तमागतंदृष्ट्वालोकाः प्रीत्यासमागताः तत्सर्वंकथितंतेनयज्जातंचयथातथा
३७ विद्वांसोयोगनिष्ठाश्चज्ञानिनोब्रह्मवादिनः तन्मुक्तिंनैवपश्यंतिपश्यंतःशास्त्रसंचयान् ३८ ततःसर्वैः
सूर्यवाक्यंतन्मुक्तौस्थापितंपरं गोकर्णःस्तंभनंचक्रेसूर्यवेगस्यवैतदा ३९ नमस्तुभ्यंजगत्साक्षिन्
ब्रूहिमेमुक्तिहेतुकं तच्छ्रुत्वादूरतःसूर्यःस्फुटमित्यभ्यभाषत ४० श्रीमद्भागवतान्मुक्तिःसप्ताहंवाचनं
कुरु इतिसूर्यवचःसर्वैर्धर्मरूपंतुविश्रुतं ४१ सर्वेब्रुवन्प्रयत्नेनकर्तव्यंसुकरंत्विदं गोकर्णोनिश्चयंकृ
४९ त्वावाचनार्थंप्रवर्तितः ४२ तत्रसंश्रवणार्थायदेशग्रामाज्जनाययुः पंग्वंधवृद्धमंदाश्चतेपिपापक्षयाय
वै ४३ समाजस्तुमहान्जातोदेवविस्मयकारकः यदैवासनमास्थायगोकर्णोकथयत्कथां ४४ सप्रेतो
पितदायातःस्थानंपश्यन्नितस्ततः सप्तग्रंथियुतंतत्रापश्यत्कीचकमुच्छ्रितं ४५ तन्मूलछिद्रमाविश्य
श्रवणार्थंस्थितोह्यसौ वातरूपीस्थितिंकर्तुमशक्तोवंशमाविशत् ४६ वैष्णवंब्राह्मणंमुख्यंश्रोतारंप
रिकल्प्यसः प्रथमस्कंधतःस्पष्टमाख्यानंधेनुजोकरोत् ४७ दिनांतेरक्षितागाथातदाचित्रंबभूव
ह वंशैकग्रंथिभेदोभूत्सशब्दःपश्यतांसतां ४८ द्वितीयेह्नितथासायंद्वितीयग्रंथिभेदनं तृतीयेह्नि
तथासायंतृतीयग्रंथिभेदनं ४९ एवंसप्तदिनैश्चैवसप्तग्रंथिविभेदनं कृत्वासद्वादशस्कंधश्रवणात्
प्रेतत्वंजहौ ५० दिव्यरूपधरोजातस्तुलसीदाममंडितः पीतवासाघनश्यामोमुकुटीकुंडलान्वितः ५१
ननामभ्रातरंसद्योगोकर्णमितिचाब्रवीत् त्वयाहंमोचितोबंधोकृपयाप्रेतकश्मलात् ५२ धन्या
भागवतीवार्ताप्रेतपीडाविनाशिनी सप्ताहोपितथाधन्यः कृष्णलोकफलप्रदः ५३ कंपंतेसर्वपापा

भा०म० तन्मुखेविहितविचित्तिः। अभिनवोज्ज्वालमिदं त्वनवाकुलोनिधनमास ११ तदेहममुत्रुर्गर्वेमाय-साहसि
७ का त्रिय. मज्जान्ध्रर्द्दहसपमुकेन्पापाश्चरवच १२ लोके रुषा-वरुणिसुदरयात प्रियोहिन अगामिष
निर्वेषुम्मिन्नविसलोभविकर्षित १३ त्वागाविनवविक्वासोऽन्तमानाकार्यहृत विश्वासेय विप्रतीमत्व
सद्ध रेव परिभयते १४ सुधाममवचोयासाकोमिनारसवर्द्दने हृदयन्तृधारामपिय कोनामप्रोषिता १५
सहृत्पविसूतायाम.कुलटावहभर्तका भुभुकारविकुवापमहान्मेन कुकर्मत १६ ग्रात्याकृत्पपरोतिर्ध्यो।
वन्नशाविशीतर शीतातपपरिक्लिष्टोनिराहार पिपासित १७ नलेभेशरणाकुत्राहोदैवविसुर्हवदन किंयस्का
लेन ...गोककर्णोमृतस्तोकारवुधात १८ अनाथत्वविशिष्टेवगयाप्राद्मचोकरत मस्मिन्नलीर्यदुत्तयाम।
तत्रश्राद्धमर्वनीयम १९ तथाभ्रमत्सगोकर्णस्वपुरत्दुर्मिवान रात्रौमृत्वागोमिसंभ आगतोऽन्तहित प
बै.-१९ नत्तसृम्पविज्ञायधुधुकारीस्तवाधव निशीथेदर्शयामासमहारौद्रतरवपु २० सकृन्मेष सक
हस्तीसकृच्चमहिषोऽभवत सकृदिंद्र सकृच्चाग्नि पुनश्चपुरषोऽभवत् २१ वैपरीत्यमिदंदृष्ट्वागोकर्णोध
मैसयुत अयमदुर्गतिक-कोऽपिनिश्चित्यायपितमब्रवीत २२ गोकर्णौउवाच कस्त्वमुग्रतरोरात्रौकुतोयातोदशा।
मिमा किंवाप्रेतपिशाचोवाराक्षसोसीतिशंसमे २३ सूतउवाच एवंपृष्टस्तदातेनरुरोदोच्चै पुन पु
न अशक्तोवचनेवाऽरसंज्ञामात्रंचकारह २४ ततोऽञ्जलौजलंकृत्वागोकर्णस्तमुदीरयत तत्सेकाद्
गतपापोसौप्रवक्तुमुपचक्रमे २५ प्रेतउवाच अहंभ्राताहदीपोसिधुधुकारीतिनामत स्व कीयेनैवदोषे
णब्रह्मत्वंनाशितमया २६ अहं मेकर्मणामितिर्भेसरव्यामहाज्ञानविवर्जित लोकानांहिंसकः सोहंस्त्री
भिर्दुखेनमारित २७ अत प्रेतत्वमापन्नोदुर्दशांचवहाम्यहं वाताहारेणजीवामिदैवाधीनफलोदय २८
अहोबंधोकृपासिंधोभ्रातर्मामाशुमोचय गोकर्णोवचनंश्रुत्वातस्मैवाक्यमथाब्रवीत ३० गोकर्णउवा
च त्वदर्थंतुगयापिंडोमयादत्तोविधानत तत्कथंनैवमुक्तोसिममाश्चर्यमिदमहत ३१ गयाश्राद्धान्नमु रामः
क्तिश्चेदुपायोनापरस्त्विह किंविधेयमयाप्रेततत्वंवदसविस्तर प्रेतउवाच गयाश्राद्धशतेनापिमु

धनं स्नेहवानन्धवत्स्नेहमेति । मिथ्या ७४ न चेन्द्रस्य सुखं किंचिन्न सुखं चक्रवर्तिनः सुखमस्ति विरक्तस्य मुने-
स्थाने २ रेकान्तजीविनः ७५ मुञ्चाग्रहं प्रजारूपे मोहतो नरके गतिः निपतिष्यति देहोऽयं सर्वं त्यक्त्वा वनं व्रज ७
६ तद्वाक्यं तु समाकर्ण्य गन्तुकामः पिता ब्रवीत् किं कर्तव्यं वने तात तत्त्वं वद सविस्तरं ७७ अन्धकूपे स्ने-
हपाशैर्बद्धः पङ्गुरहं शठे कर्मणा पतितो नूनं मामुद्धर दयानिधे ७८ गोकर्ण उवाच देहेऽस्थिमांसरुधि-
रेऽभिमतिं त्यज त्वं जायासुतादिषु सदा ममतां विमुञ्च पश्यानिशं जगदिदं क्षणभङ्गनिष्ठं वैराग्यरागरसिको
भव भक्तिनिष्ठः ७९ धर्मं भजस्व सततं त्यज लोकधर्मान् सेवस्व साधुपुरुषाञ्जहि कामतृष्णाम् अन्यस्य
दोषगुणचिन्तनमाशु मुक्त्वा सेवाकथारसमहो नितरां पिब त्वं ८० एवं सुतोक्तिवशतोऽपि गृहं विहाय या-
तो वनं स्थिरमतिर्गतषष्टिवर्षः युक्तो हरेरनुदिनं परिचर्ययासौ श्रीकृष्णमाप नियतं दशमस्य पाठात्
८१ इति श्रीपद्मपुराणे उत्तरखण्डे श्रीभागवतमाहात्म्ये विप्रमोक्षो नाम चतुर्थोऽध्यायः ४ श्री
सूत उवाच पितर्युपरते तेन जननी ताडिता भृशं क्व वित्तं तिष्ठति ब्रूहि हनिष्ये लत्तया न चेत् १ इति
तद्वाक्यसंत्रासाज्जनन्या पुत्रदुःखतः कूपे पातः कृतो रात्रौ तेन सा निधनं गता २ गोकर्णस्तीर्थया-
त्रार्थं निर्गतो योगसंस्थितः न दुःखं न सुखं तस्य न वैरी नच बान्धवः धुन्धुकारी गृहेऽतिष्ठत्पञ्चपण्यव-
धूवृतः अत्युग्रकर्मकर्ता च तत्पोषणविमूढधीः ४ एकदा कुलटास्तास्तु भूषणान्यभिलिप्सवः
तदर्थं निर्गतो गेहात्कामान्धो मृत्युमस्मरन् ५ यतस्ततश्च संहृत्य वित्तं वेश्म पुनर्गतः ताभ्योऽयच्छत्सु-
वस्त्राणि भूषणानि कियन्ति च ६ बहुवित्तचयं दृष्ट्वा रात्रौ नार्यो व्यचारयन् चौर्यं करोत्यसौ नित्य-
त३ मतो राजा ग्रहीष्यति ७ वित्तं हृत्वा पुनश्चैनं मारयिष्यति निश्चितं अतोऽर्थगुप्तये गूढमस्माभिः किं न हन्य-
ते ८ निहत्यैनं गृहीत्वार्थं यास्यामो यत्र कुत्रचित् इति ता निश्चयं कृत्वा सुप्तं संबध्य रश्मिभिः ९ पा-
शं कण्ठे निधायास्य तन्मृत्युमुपचक्रमुः त्वरितं न ममारासौ चिन्तायुक्तास्तदाभवन् १० तप्ताङ्गारसमूहांश्च

भा०मा० शोकि सावित्रीम्मम गर्भेस्तिते दास्यामि प्रसन्नित ५२ तावत्कालस्य गर्भे विगुप्तानित्य सुखम्गृहे विन्ना
८ मल्पते धे पुत्र सते दास्यति बालक ५३ सा प्रमासकोम्म तो बालः तिस्रो के वस्थिता दे तवास्य पोषधिस्या मिनि
समागतपते गृहे ५४ फलमस्य प्रेतो स्त्वपरीक्षार्थमनुसाप्रत नवदीच विलम्बं नमेधे वस्त्रोम्स्वभावत ५५
स्वपकालेन सा नारी प्रसूता बालकं तदा ज्ञानी पवजनको बालरस्थपधुधुलीस्वदो ५६ सख्याचक श्चि
नम्भर्यं प्रसूत सुखमर्भक लोकस्य सुखमुत्पन्न मालादेवप्रजो स्याम ५७ द्दो दानं बहु जातिमा ज्ञातक
मिविधायच शीतवाद्वित्रघोषो भन्नाहारेवकुमगाल ५८ भर्त्रो गेत सा तु वीहा कपतन्धानाभिक चेमम
अन्यस्त्रे न निर्दुग्धाक पपश्चामि बालक ५९ मत्स्य सुस्तप्रस न्नम्याम तोवालस्तुर्वते ताभाकार
यथो हेरस्य सानेभं तोमवयिष्यति ६० पतिकान्त्व मसर्वपुत्र रत्नाहितेव पुत्रस्य धुधुकारीति नाम मातापति
पित्रे ६१ त्रिमासे निर्गते चाथ साधेनुः सुषुवे भक सर्वांगसुन्दरं दिव्यं निर्मल कनकप्रभं ६२ दृष्ट्वा प्रसन्नो
विप्रस्तु संस्कारान् स्वयमादधे मत्वाश्चर्यं जना सर्वे दिदृक्षार्थं समागता ६३ भाग्योदयो धुनाजातं आ
तमेदेवस्य पश्यत धेनवाल प्रसूतस्तु देवरूपीतिकोतुक ६४ नज्ञानमह हस्यतुं कन्याषिविधियोगत गो
कर्णं चिसुतं दृष्ट्वा गोकर्णं नाम चाकरोत् ६५ कियत्कालेन तौ जातो तरुणौ तनयौ तुतो गोकर्णः पण्डितो
ज्ञानी धुधुकारी महाखल ६६ स्नान शौच क्रियाहीनो दुर्भक्षी क्रोधसयुत दुष्परिग्रहकर्ता च शवहस्ते
न भोजनी ६७ चौरः सर्वजन द्वेषी परवेश्मप्रदीपक लालनायार्भकानेव सत्वा सद्यः कूपेनिपातये
त् ६८ हिंसक शस्त्रधारी च दीनान्धानां प्रपीडक चाण्डालाभिरतो नित्यं पाशहस्त श्वसंगत ६९ ते।
न वेश्याकुसंगेन पित्र्यं वित्तं तु नाशितं एकदा पितरौ ताड्य पात्राणि स्वयमाहरत ७० तत्पिता कृपणः प्रो
च्चैर्धनहीनो रुरोदह वंध्यत्वं तु समीचीनं कुपुत्रो दुःखदायक ७१ क्व तिष्ठामि क्व गच्छामि को मेदु खंव्यपो
होहयेत् प्राणांस्त्यजामि दुःखेन हा कष्टं मम संस्थित ७२ तदानीं तु समागत्य गोकर्णो ज्ञानसंयुत बोध राम
यामास जनकं वैराग्यं परिदर्शयन ७३ असार खलु संसारं दुःखरूपी विमोहन क सुत कस्य च
८

वितोदच्च सोपि बध्वात्वमाक्रमयेत ३० यत्र स्मसूद्रा फलश्रेष्ठमच्च विश्रुयाति निर्मोगपर्ष्यानपत्यस्य।
कि मतो जीविते नमे ३१ इत्युक्त्वा सहरोदो चेलत्याजे दृ खेदितिम महामस्य यते बिने कररगा गद्ध
रीयसी ३२ तद्दृत्वा सरमात्वाच्च वाचयामास पीगवान् सर्वज्ञात्वायति पश्चाद्विप्रमखेसविस्तरं।
३३ यतिरुवाच अमाविप्रमयातेसुप्रारअंबुविलोकिते सप्तजन्मावधितवपुत्रो नैवचमैवच ३४
मुचोज्ञानं प्रजारु पवलिखाक मेलोगति विवेकमुसमाक्रिस्यमज्जससारवासना ३५ समते सगो
दु खमवाप्यागपुरान्पथा रेसुचाग्यकुहवाप्या सम्पासेस वैपासुख ३७ ब्राह्मणउवाच विवेकेनमबे
किं मेपुत्रैरेहि वत्सारपि जोचेत्पजाम्यहं प्राणा स्त्वदंग्रेशोकमूर्छित ३८ पुत्राभेसुखहीनमन्या।
स भुक्त एवहि मत्स्य सरसोलोके पुत्रपौत्रसमाकुल ३९ नयाम्यतिसुखपुत्राणां यादेवहतो।
श्रम आमोहवोन युक्तोस्मिन्सर्वथेनकिंवदाम्यहं ४० इतिविप्रास्यहट्टं ज्ञात्वाश्रुवीस्ततपोधन वि
चक्षैकृगीतं कष्टं विधिलेखविमार्जनात् ४१ तस्याग्रहसमालोक्यफलमेकमदत्तवान् इदमद्
यपत्नीस्वतत्ते पुत्रीभविष्यति ४२ सत्यं शौचंदयादानमेकभक्तं तुभोजन वर्षावधि द्विजपाकार्यं
तेनपुत्रोतिनिर्मल ४३ एवमुक्त्वा ययौयोगी विप्रस्तुग्रहमागत पत्न्या पाणौफलंदत्वा स्वयं यातस्तु कुत्रचित
४४ तरुणीकुटिलात स्य स्वस्यगेचरसरोदह आप्नहो चिंतामभोत्पन्नाफलचाहनभक्षये ४५ फलभक्षेण
गर्भ स्याद्गर्भेणोदरवृद्धिता स्वल्पभक्ष्यततोशक्ति अंदुकार्यं कथं भवेत् ४५ दैवाद्धारी भवेद्ग्रामे पलायेदु
भिंशीकथं शुकवन्निवसेद् गेहे सुकुले कथमुत्सृजेत ४६ निर्दयश्चे दरागभोगार्भस्तदा मेमरणं भवेत
प्रसूताद्यस्सादुःखंसुकुमारी कुथसहेत ४७ सदायामपिसर्वस्वं ननेदासरू रेत्तदा सन्यथावादिनि ममो
दुराराध्य सहिष्यते ४८ लालनेपालनेदुःखं प्रसूतायाप्रजायते बंध्याचविधवानारी सुखिनीचेति
मेमति ४९ एवंकुतर्कयोगेन तत्फलं नैवभक्षितम् पृष्टाद्य फलंभुक्तं चेतितयोरितं ५० एकदामगि
नीतस्यास्सद्वृहं चिह्नयाभता, तद्ग्रेकथितं सर्वांचिंतयमहतीमिमे ५१ दुःखलातेमद् खेनत्वनुजकरवा।

भी०मी०

७ पापकृतोपि सर्वदा सद्दुराचाररता विमार्गा क्रोधाग्निरता कुटिलाज्ञकामिन समाहयतेन।
कलौ पुनर्भिते ११ सत्येनहीना पितृमातृदूषका स्वस्मात् कुलोत्पन्ना स्वधर्मवर्जिता येऽपि कामा
त्मविरोधिहिंसका समाह्यते न कलौ पुनर्भिते १२ ये चोग्रपापा च्छलस्यवृत्तिकारिणः क्रूरा विशाच
रवनिर्दयाश्च ये ब्रह्मस्वपुष्टा येऽभिचारिकारिणः समाह्यतेन कलौ पुनर्भिते १३ कायेन वाचा मन
सापि पातकं नित्यं प्रकुर्वन्ति शठा हि ये नये परस्वमुष्टा मलिना दुराशया समाहयतेन कलौ पुनर्भिते १४
अत्रैकपापिष्ठाभिः तिहासपुरातनं यस्य श्रवणमात्रेण पापहानि परं भवेत् १५ तुगभद्रातटे पूर्वं
अभूत्पत्तनमुत्तमं यत्र वर्णा स्वधर्मेण सत्यसत्कर्मतत्पराः १६ आत्मदेव पुरे तस्मिन् सर्ववेदविशा
रद श्रौतस्मार्तेषु कुशलो द्वितीय इव भास्करः १७ भिक्षुको वित्तवान् लोके तत्प्रिया धुंधुली स्मृता
स्ववाक्यस्थापिका नित्यं सुन्दरी सुकुलोद्भवा १८ लोकवार्तारता क्रूरा प्रायशो बहुजल्पका शूरा च
गृहकृत्येषु कृपणा कलहप्रिया १९ एवं निवसतो प्रेम्णा दंपत्यो रमतः स्वयो अर्थकामास्तयो रास
न्न सुखाय गृहादिकं २० पश्चाद्धर्माः समारब्धास्ताभ्यां सन्तानहेतवे गोभूहिरण्यवासांसि दीनेभ्यो।
यच्छतो सदा २१ धनार्द्धं धर्ममार्गेण ताभ्यां नीतं तथापि च न पुत्रो नापि वा पुत्री ततश्चिन्तातुरो भृशं २२
एकदा स द्विजो दुःखाद् गृहं त्यक्त्वा गतो वनं मध्याह्ने तृषितो यातस्तडागं समुपाविशत् २३ पीत्वा जलं नि
षण्णस्तु प्रजादुःखेन कर्षितः मुहूर्तादपि तत्रैव संन्यासिकश्चिदागतः २४ दृष्ट्वा पीतजलं तं तु वि
प्रो यातस्तदन्तिके नत्वा च पादयोस्तस्य निश्वसन् संस्थितः पुरः २५ यतिस्तवाच कथं रोदिषि विप्र त्वं।
का ते चिन्ता बलीयसी वद त्वं सत्वरं मह्यं स्वस्य दुःखस्य कारणं २६ ब्राह्मणोऽवाच किं ब्रवीमि ऋषे
दुःखं पूर्वपापेन सञ्चितं मदीयाः पूर्वजास्तोयं कवोष्णमुपभुञ्जते २७ मद्दत्तं नैव गृह्णन्ति प्रीत्या देवा द्विजा।
नम प्रजादुःखेन शून्योऽहं प्राणांस्त्यक्तुमिहागतः २८ धिग्जीवितं प्रजाहीनं धिग्गृहं च प्रजां विना धि रामः
ग्धनं चानपत्यस्य धिक्कुलं सन्ततिं विना २९ पाल्यमानया गावश्चेत् सा च वंध्या सर्वथा भवेत् यो मया रोपि।
१

ऊचुः कुमारा वचनं तदानीं कथां वदामो नितरां धुनेय एवमिह साश्रमुन्निशम्य सनत्कुमारैर्निजगाद।
नम्रा ६८ भक्तिरुवाच भवद्भिरद्यैव कृतास्मि पुष्टा कलिप्रणष्टापि कथारसेन क्वाहं तु तिष्ठाम्यधुना
ब्रुवन्तु ब्राह्मी इतीदमुक्तं मचिरेते ६९ भक्तेषु गोविन्दस्वरूपधात्री प्रेमैककर्त्री भवरोगहन्त्री सा त्वं च
तिष्ठस्व सुधैर्यसंश्रया निरन्तरं वैष्णवमानसानि ७० ततोपि दोषाः कलिजा इमे त्वां द्रष्टुं न शक्ताः प्र
भवोपि लोके एवं तदाज्ञावसरेपि भक्तिः सन्निषण्णा हरिदाससचित्ते ७१ सकलभुवनमध्ये निर्धनास्तेपि
धन्या निवसति हृदि येषां श्रीहरेर्भक्तिरेका हरिरपि निजलोकं सर्वथातो विहाय प्रविशति हृदि येषां
भक्तिसूत्रोपनद्धः ७२ ब्रूमोद्य ते किमधिकं महिमानमेवं ब्रह्मात्मकस्य भुवि भागवताभिधस्य यत्सं
श्रयान्निगदिते लभते सुवक्ता श्रोतापि कृष्णसमतामलमन्यधर्मैः ७३ इति श्रीपद्मपुराणे उत्तरखंडे
श्रीभागवतमहात्म्ये भक्तिकष्टनिवर्तनो नाम तृतीयोध्यायः ३ सूत उवाच अथ वैष्णवे
वचित्तेषु दृष्ट्वा भक्तिमलौकिकीं निजलोकं परित्यज्य भगवान्भक्तवत्सल १ वनमाली घनश्या
म पीतवासा मनोहर कांचीकलापरुचिरो लसन्मकरकुंडल २ त्रिभंगललितश्चारुकौस्तुभेन
विराजित कोटिमन्मथलावण्यो हरिचंदनचर्चित ३ परमानंदचिन्मूर्ति मधुरो मुरलीधर आवि
वेश स्वभक्तानां हृदयान्यमलानि च ४ वैकुंठवासिनो ये च वैष्णवा उद्धवादयः तत्कथाश्रवणार्थं ते गू
ढरूपेण संस्थिता ५ तदा जयजयारावो रसपुष्टिरलौकिकी चूर्णप्रसूनवृष्टिश्च मुहुः शंखरवो
ऽप्यभूत् तत्सभासंस्थितानां च देहगेहात्मविस्मृतिः ६ दृष्ट्वा च तन्मयावस्थां नारदो वाक्यमब्रवीत् ७
अलौकिकोयं महिमा मुनीश्वराः सप्ताहजन्योद्य विलोकितो मया मूढाः शठा ये पशुपक्षिणोत्र सर्वे
ऽप्यत्र निष्पापतमा भवंति ८ अतो नृलोके ननु नास्ति किंचिच्चित्तस्य शोधाय कलौ पवित्रं अघौघ
विध्वंसकरं कथायाः कथासमानं भुवि नास्ति चान्यत् ९ के के विशुद्ध्यंति वदंतु मह्यं सप्ताहयज्ञेन कथा
मयेन कृपालुभिर्लोकहितं विचार्य प्रकाशितः कोपि नवीनमार्गः १० कुमारा ऊचुः ये मानवाः

भा०मा० कतं ५८ यत्फलं नास्ति तपसा न योगेन समाधिना अनायासेन तत्सर्वं सप्ताहश्रवणे फलं ५९ य
६ ज्ञाद्गर्जति सप्ताहः सप्ताहो गर्जति व्रतात् तपसो गर्जति प्रोच्चैस्तीर्थं नित्यं हि गर्जति ५० योगाद्गर्ज
ति सप्ताहो ध्यानात् ज्ञानाच्च गर्जति किं ब्रूमो गर्जनं तस्य रे रे गर्जति ५१ शौनक उवाच साश्चर्य गर्जति २
मेतत्कथितं कथानकं ज्ञानादिधर्मान् विगणय्य सांप्रतं निःश्रेयसे भागवतं पुराणं जातं कुतो यो
गविदादिसूचकं ५२ सूत उवाच यदा कृष्णो धरां त्यक्त्वा स्वपदं गन्तुमुद्यतः एकादशं परिश्रुत्यापु
द्धवो वाक्यमब्रवीत् ५३ उद्धव उवाच त्वं तु यास्यसि गोविन्द भक्तकार्यं विधाय च मच्चित्ते महती चिन्ता
तां श्रुत्वा सुखमावह ५४ आगतोऽयं कलिर्घोरो भविष्यन्ति पुनः खलाः तत्संगेनैव सन्तोऽपि गमिष्य
न्त्युग्रतामतः ५५ तदा भारवती भूमिर्गोरूपेयं कमाश्रयेत् अन्यो न दृश्यते त्राता त्वत्तः कमललो
चन ५६ अतः सत्सु दयां कृत्वा भक्तवत्सल मा व्रज भक्तार्थं सगुणो जातो निराकारोऽपि चिन्मयः
५७ त्वद्वियोगेन ते भक्ताः कथं स्थास्यन्ति भूतले निर्गुणोपासने कष्टमतः किंचिद्विचारय ५८ इत्यु
द्धववचः श्रुत्वा प्रभासेऽचिन्तयद्धरिः भक्तावलम्बनार्थाय किं विधेयं मयेति च ५९ स्वकीयं यद्भवेत्ते चे७
जस्तद्धि भागवतेऽदधात् तिरोधाय प्रविष्टोऽयं श्रीमद्भागवतार्णवं ६० तेनेयं वाङ्मयी मूर्तिः प्रत्यक्षा व
र्तते हरेः सेवनाच्छ्रवणात्पाठाद्दर्शनात्पापनाशिनी ६१ सप्ताहश्रवणं तेन सर्वेभ्योऽप्यधिकं कृ
तं साधनानि तिरस्कृत्य कलौ धर्मोऽयमीरितः ६२ दुःखदारिद्र्यदौर्भाग्यपापप्रक्षालनाय च कामक्रो
धजयार्थं हि कलौ धर्मोऽयमीरितः ६३ अन्यथा वैष्णवी माया देवैरपि सुदुस्त्यजा कथं त्याज्या भवेत्पुं स्क५
भिः सप्ताहोऽतः प्रकीर्तितः ६४ सूत उवाच एवं नगाहश्रवणोरुधर्मे प्रकाश्यमाने ऋषिभिः
सभायां आश्चर्यमेकं समभूत्तदानीं तदुच्यते संशृणु शौनक त्वं ६५ भक्तिः सुतौ तौ तरुणौ गृहीत्वा
प्रेमैकरूपा सहसाविरासीत् श्रीकृष्ण गोविन्द हरे मुरारे नाथेति नामानि मुहुर्वदन्ती ६६ तां चागतां
भागवतार्थभूषां सुचारुवेषां ददृशुः सदस्याः कथं प्रविष्टा कथमागतेयं मध्ये मुनीनामिति तर्कयन्तः ६७ राम
६

शास्त्रं मुक्तिः सनेन गर्जति २८ कथा भागवतस्यापि नित्यं भवति यद्गृहे तद्गृहं तीर्थरूपं हि वसतां पापना
शनं २९ अश्वमेधसहस्राणि वाजपेयशतानि च शुकशास्त्रकथायाश्च कलां नार्हंति षोडशीं ३० तावत्पा
पानि देहेस्मिन्निवसंति तपोधनाः यावन्न श्रूयते सम्यक् श्रीमद्भागवतं नरैः ३१ न गंगा न गया काशी पु
ष्करं न प्रयागकं शुकशास्त्रकथायाश्च फलेन समतां नयेत् ३२ श्लोकार्द्धं श्लोकपादं वा नित्यं भागवतो
द्भवं पठस्व स्वमुखेनैव यदिच्छसि परां गतिं ३३ वेदादिर्वेदमाता च पौरुषं सूक्तमेव च त्रयी भागवतं चैव द्वा
दशाक्षरमेव च ३४ द्वादशात्मा प्रयागश्च कालः संवत्सरात्मकः ब्राह्मणाश्चाग्निहोत्रं च सुरभिर्द्वादशी
तथा ३५ तुलसी च वसंतश्च पुरुषोत्तम एव च एतेषां तत्वतः प्राज्ञैर्न पृथग्भाव इष्यते ३६ यस्तु भागव
तं शास्त्रं वाचयेदर्थतोनिशं जन्मकोटिकृतं पापं नश्यते नात्र संशयः ३७ श्लोकार्द्धं श्लोकपादं वा
पठेद्भागवतं च यः नित्यं पुण्यमवाप्नोति राजसूयाश्वमेधयोः ३८ उक्तं भागवतं नित्यं कृतं च हरिचिंतनं
तुलसीपोषणं चैव धेनूनां सेवनं समं ३९ अंतकाले तु येनैव श्रूयते शुकशास्त्रवाक् प्रीत्या तस्यैव वैकुं
ठं गोविंदोपि प्रयच्छति ४० हेमसिंहयुतं चैतद्वैष्णवाय ददाति यः कृष्णेन सह सायुज्यं स पुमान् लभते ध्रुवं।
४१ आजन्ममात्रमपि येन शठेन किंचिच्चित्तं विधाय शुकशास्त्रकथा न पीता चांडालवच्च खरवद्बत तेन
नीतं मिथ्या स्वजन्म जननी दुःखभाजा ४२ जीवच्छवो निगदितः स तु पापकर्मा येन श्रुतं शुककथा
वचनं न किंचित् धिक् तं नरं पशुसमं भुवि भाररूपमेवं वदंति दिवि देवसमाजमुख्याः ४३ दुर्लभैव
कथा लोके श्रीमद्भागवतोद्भवा कोटिजन्मसमुत्थेन पुण्येनैव तु लभ्यते ४४ तेन योगनिधे धीम
न् श्रोतव्या सा प्रयत्नतः दिनानां नियमो नास्ति सर्वदा श्रवणं मतं ४५ सत्येन ब्रह्मचर्येण सर्वदा श्रवणं म
तं अशक्यत्वात्कलौ बोध्यो विशेषोत्र शुकाज्ञया ४६ मनसश्चानयाद्रोगात्पुंसां चैवायुषः क्षयात् क।
मर लेर्दोषबहुत्वाच्च सप्ताहश्रवणं मतं ४७ मनोवृत्तिजयश्चैव नियमाचरणं तथा दीक्षां कर्तुमशक्यत्वात्स
प्ताहश्रवणं मतं ४८ श्रद्धातः श्रवणे नित्यं माघे तावद्धि यत्फलं तत्फलं शुकदेवेन सप्ताहश्रवणे

भा०मा० नेन कथासारं समाकर्ण्य पितृश्चिकंकरः गतापते ९ सप्ताहं पुरस्थं निर्मितस्यैवकुण्डराजोऽभिकस्लेबरं तद्
५ धेनुपुरस्कृत्य भक्तिमत्त्वाग्रामिष्यति ९ सर्वमुक्ता कुमारा स्तेनारदेन समेतनः श्रवणान्दसमाजग्मुः कथा
पानामृतत्परा: १० महायानात्कर्देयन्तुः लसाको लाहल्लोपभरत् भूलोके देवलोके च ब्रह्मलोके तथैव
च ११ श्रीमद्भागवतपीयूषपानाय रसलंपटाः तावत्तोप्यायायुः सर्वे प्रथमं पंचवे स्मवाः १२ भृगु
अ०६ र्वसिष्ठश्च्यवनगोतम मेधातिथिर्देवलोदेवरातो रामस्तथागाधिसुतश्चशाकल्यो मृकंडुपुत्रात्रि
पिप्पलादाः १३ योगेश्वरव्याससपराशरौच छायाशुकोजाजलिजन्हुमुख्याः सर्वेप्यमी मुनिगणाः
सहपुत्रमित्रस्वस्त्रीभिरत्ययुरतिप्रणयेन युक्ताः १४ वेदान्तानि च वेदाश्च मंत्रास्तंत्राः समूर्तयः दश
सप्तपुराणानि षट्शास्त्राणि तदाययुः १५ गंगाद्याः सरितस्तत्र पुष्करादि सरांसि च क्षेत्राणि च दि
शःसर्वादंडकादिवनानि च १६ नगादयो ययुस्तत्र देवगंधर्वकिन्नराः गुरुत्वात्तत्र नायाता स्तान्भृगुःस
बोध्यचानयत् १७ दीक्षिता नारदेनाथ दत्तमासनमुत्तमं कुमारा वंदिताः सर्वेर्निषेदुः कृष्णतत्पराः १
८ वैष्णवाश्च विरक्ताश्च संन्यासिब्रह्मचारिणः मुखभागे स्थितास्ते च तदग्रे नारदः स्थितः १९ एक
भागे ऋषिगणास्तथान्यत्र दिवौकसः वेदोपनिषदोन्यत्र तीर्थान्यत्र स्त्रियोन्यतः २० जयशब्दो न
मःशब्दः शंखशब्दस्तथैव च चूर्णलाजाप्रसूनानां निक्षेपस्तु महानभूत् २१ विमानानि समारुह्य
कियंतो देवनायकाः कल्पवृक्षप्रसूनैस्तान्सर्वांस्तत्र समाकिरन् २२ सूत उवाच एवं तेष्वेकचित्तेषु
श्रीमद्भागवतस्य च माहात्म्यमूचिरे स्पष्टं नारदाय महात्मने २३ कुमारा ऊचुः अथ ते संप्रवक्ष्यामो महिमानं
शुकशास्त्रजं यस्य श्रवणमात्रेण मुक्तिः करतले स्थिता २४ सदा सेव्या सदा सेव्या श्रीमद्भागवती कथा
यस्याः श्रवणमात्रेण हरिश्चित्तं समाश्रयेत् २५ ग्रंथोष्टादशसाहस्रो द्वादशस्कंधसंमितः परी
क्षिच्छुकसंवादः शृणु भागवतं च तत् २६ तावत्संसारचक्रेस्मिन्भ्रमतेऽज्ञानतः पुमान् यावत्क राम:
र्णगता नास्ति शुकशास्त्रकथा क्षणं २७ किं श्रुतैर्बहुभिः शास्त्रैः पुराणैश्च भ्रमावहैः एकं भागवतं ५
भा०१

स्त उवाच वेदवेदांतघोषैश्च गीतापाठैः प्रबोधितं भक्तिज्ञानविरागाणां नोदतिष्ठत्त्रिकं हि यत् ६४ श्री।
मद्भागवतालापात्तत्कर्म बोधमेष्यति. तत्र कथासु च वेदार्थाः श्लोके श्लोके पदे पदे ६५ छिंदंतु संशयं ह्येतं।
न भवंतो मोघदर्शनाः विलंबो नात्र कर्तव्यः शरणागतवत्सलाः ६६ कुमारा ऊचुः वे ? दोपनिषदां सारा
ज्जाता भागवती कथा अत्युत्तमा ततो भाति पृथग्भूता फलाकृतिः ६७ आमूलाग्रं रसस्तिष्ठन्नास्ते न स्व
दते यथा संभूय पृथग्भूतः फले विश्वमनोहरः यथा दुग्धे स्थितं सर्पिर्न स्वादायोपकल्पते पृथग्भू
तं हि तद्गव्यं देवानां रसवर्द्धनं ६९ इक्षूणामादिमध्यांतं शर्करा व्याप्य तिष्ठति पृथग्भूता च सा मिष्टा।
तथा भागवती कथा ७० इदं भागवतं नाम पुराणं ब्रह्मसंमितं भक्तिज्ञानविरागाणां स्थापनाय प्रकाशितं।
वेदांतवेदसुस्नाते गीताया अपि कर्तरि परितापवति व्यासे मुह्यत्यज्ञानसागरे ७२ तदा त्वया पुरा प्रोक्तं
चतुःश्लोकसमन्वितं तदीयश्रवणात्सद्यो निर्बाधो बादरायणः ७३ श्रीनारद उवाच यद्दृष्टं भवति
हेत्या शुभाभिसद्य. क्षयस्तत्तो तिमेव दुःखदारिद्र्यनाशिनी। शोकशोकमुक्तगीता कृष्णानाः प्रेमप्रकाश।
कृतवेशरणागतोस्मि ७५ भाग्योदयेन बहुजन्मसमार्जितेन सत्संगमेव लभते यदि वैसमवानां। अज्ञा
नहेतुकृतिमोहमदांधकारनाशं विधाय हि तदोदयते विवेकः ७६ इति श्रीभागवतेस्य पद्मपुराणे उत्तरखं
डे श्रीभागवतमाहात्म्ये कुमारनारदसंवादे द्वितीयोध्यायः २ श्रीनारद उवाच ज्ञानयज्ञं करिष्यामि शुकशास्त्र
कथोज्वलं भक्तिज्ञानविरागाणां स्थापनार्थं प्रयत्नतः १ कार्यो मया यत्र स्थानं तद्वाच्यतामिह महिमा।
शुकशास्त्रस्य वक्तव्यो वेदपारगैः २ कियद्भिर्दिवसैः श्राव्या श्रीमद्भागवती कथा को विधिस्तत्र कर्तव्यो ममेदं
ना०७ वदांभितः ३ कुमारा ऊचुः शृणु नारद वक्ष्यामो विनम्राय विवेकिने गंगाद्वारसमीपे तु वनमानंदना
मकं ४ नानाऋषिगणैर्जुष्टं देवसिद्धनिषेवितं नानातरुलताकीर्णं नवकोमलवालुकं ५ रम्य।
मेकांतदेशस्थं हेमपद्मसुशोभितं यत्समीपस्थजीवानां वैरं चेतसि न स्थितं ६ ज्ञानयज्ञस्त्वया तत्र क २२
र्तव्यो ह्यप्रयत्नतः अपूर्वा रसरूपा च कथा तत्र भविष्यति ७ पुरःस्थं भागवतीवार्ता तत्र भक्त्यादिकं त्र

भा० मा० तेषकुमितरेरिहमानवे. एवंश्च मिश्रीः दके: निरीयोलकुराशयं ४२ ततश्चित्रातुरःसोथबस्तीव
५ नमागतः तपश्चरामिचात्रेतितस्यैकृतनिश्चय ४३ नावदूरस्थपुरतः सनकाद्यान्मुनीश्वरान् ।
टि३ कोमस्पसंभाषानुवाचमुनिसत्तमः ४४ नारदउवाच रहानीम्रविभागेनभवतांसंगमःस्थित. कु
मारावदतश्रीघ्रंकथयाकल्याममाधरि ४५ भवंतोयोगिनःसर्वेबुद्धिमंतोबहुश्रुताः पंचहायनसंयुक्ताः ३४
सर्वेषामपिपूर्वजाः ४६ सदावैकुंठनिलयाः हरिकीर्तनतत्पराः लीलामृतरसोन्मत्ताः कथामात्रैक
जीविनः ४७ हरिःशरणमेवेहिनित्यंयेषांमुखेवचः अतःकालसमादिष्टाजरायुष्माननबाधते ४८
येषांभ्रूभंगमात्रेणद्वारपालौहरेःपुरात् भूमौनिपतितौसद्योयत्कृपातःपुरंगतौ ४९ अहोभाग्य
योगेनदर्शनंभवतामिह अनुग्रहस्तुकर्तव्योमयिदीनेदयापरैः ५० अशरीरगिरोक्तंयत्किंतत्
साधनमुच्यतां अनुष्ठेयंकथंतावत्प्रब्रुवंतुसविस्तरं ५१ भक्तिज्ञानविरागाणांसुखमुत्पद्यतेकथं
यं स्थापनंसर्ववर्णेषुप्रेमपूर्वंप्रयत्नतः ५२ कुमाराऊचुः माचिंतांकुरुदेवर्षेहर्षंचित्तेसमावह
उपायसुखसाध्योत्रवर्ततेपूर्वएवहि ५३ अहोनारदधन्योसिविरक्तानांशिरोमणिः सदाश्रीकृ
ष्णदासानामग्रणीर्योगभास्करः ५४ त्वयिचित्रंनमंतव्यंभक्त्यर्थमनुवर्तिनि घटतेकृष्णदासस्य
भक्तेःसंस्थापना सदा ५५ ऋषिभिर्बहवोलोकेपंथानःप्रकटीकृताः श्रमसाध्याश्चतेसर्वेप्रायःस्वर्गफलप्रदाः ५६
वैकुंठसाधकःपंथासतुगोप्योहिवर्तते तस्योपदेष्टापुरुषःप्रायोभाग्येनलभ्यते ५७ सत्कर्मतवनिर्दिष्टंव्यो
मवाचातुयत्पुरा तदुच्यतेशृणुष्वाद्यस्थिरचित्तःप्रसन्नधीः ५८ द्रव्ययज्ञास्तपोयज्ञायोगयज्ञास्तथाप
रे स्वाध्यायज्ञानयज्ञाश्चतेतुसत्कर्मसूचकाः ५९ सत्कर्मसूचकोनूनंज्ञानयज्ञःस्मृतोबुधैः श्रीमद्भा
गवतालापःसतुगीतःशुकादिभिः ६० भक्तिज्ञानविरागाणांतद्घोषेणबलंमहत् व्रजिष्यतिद्वयोःकष्ट
सुखंभक्तेर्भविष्यति ६१ प्रलयंहिगमिष्यंतिश्रीमद्भागवतध्वनेः कलेर्दोषाइमेसर्वेसिंहशब्दाद्वृका रामः
इव ६२ ज्ञानवैराग्यसंयुक्ताभक्तिःप्रेमरसावहा प्रतिगेहंप्रतिजनंततःक्रीडांकरिष्यति ६३ श्रोता ४

लिर्षीभक्तिभिर्मया ह्रसः पुर स्थितः १९ भक्तिद्रोहकरा ये च ते सीदन्ति जगत्त्रये दुर्वासा दुःखमापन्नः पुराभ
क्तविनिंदकः २० अलं व्रतैरलं तीर्थैरलं योगैरलं मखैः अलं ज्ञानकथालापैर्भक्तिरेकैव मुक्तिदा २१ सू
त उवाच इति नारदनिर्णीतं स्वमाहात्म्यं निशम्य सा सर्वांगपुष्टिसंयुक्ता नारदं वाक्यमब्रवीत् २२ भक्ति
रुवाच मुने प्रबुध्यतां मे तौ ज्ञानवैराग्यपुत्रकौ हाभ्यांसुनाभ्यांसाकं वैरभिः थामियपासुखं २३ तस्या
वचः समाकर्ण्य करुणान्नारदो गतः तपोवीधनमारेभे कराग्रेणाविमर्दयन् २४ मुखं चोज्य कर्णांते।
शब्दं चैव समुच्चरन् ज्ञान प्रबुध्यतां शीघ्रं रे वैराग्य प्रबुध्यतां २६ वेदवेदान्तघोषैश्च गीतापाठैर्मुहुर्मुहुः
बोध्यमानौ तदा तेन कथंचिच्चोत्थितौ बलात् २७ नेत्रैरनवलोकेतौ सालसावुभौ बकवत्पलितौ प्रायः। उत्थितौ ७
शुष्ककाष्ठसमांगतौ २८ क्षुत्क्षामौ तौ निरीक्ष्यैव पुनः स्वापपरायणौ ऋषिश्चिन्तापरो जातः किं विधेयं
६९ ममेति च २९ अहो निद्रा कथं याति वृद्धत्वं च महत्तरं चिन्तयन्निति गोविन्दं स्मारयामास भार्गव ३० व्यो
मवाणी तदैवाभूत् मा ऋषे खिद्यतामिति उद्यमः सफलस्ते शुभ भविष्यति न संशयः ३१ एतदर्थं तु सत्कर्म
सुरर्षे त्वं समाचर तत्ते कर्माभिधास्यंति साधवः साधुभूषणाः ३२ सत्कर्मणि कृते तस्मिन् सनिद्रा वृद्धता
नयोः गमिष्यति क्षणाद्भक्तिः सर्वतः प्रसरिष्यति ३३ इत्याकाशवचः स्पष्टं तत्सर्वैरपि विश्रुतं नारदो
विस्मयं लेभे नेदं ज्ञातमिति ब्रुवन् ३४ नारद उवाच अनयाकाशवाण्यापि गोप्यत्वेन निरूपितं किं वा त
त्साधनं कार्यं येन कार्यं भवेत्तयोः ३५ क्व भविष्यंति संतस्ते कथं दास्यंति साधनं मयात्र किं प्रकर्तव्यं
यदुक्तं व्योमभाषया ३६ सूत उवाच तत्र तावपि संस्थाप्य निर्गतो नारदो मुनिः तीर्थं तीर्थं विनिःक्रम्य पृ
च्छन्मार्गे मुनीश्वरान् ३७ वृत्तांतः श्रूयते सर्वैः किंचिन्निश्चित्य नोच्यते असाध्यं केचन प्रोचुः दुर्ज्ञेय
